[1]ब्रह्मज्यः, प्रज्यः, [2]ज्यायः, ज्यापः, जिज्यासुः, [3]जेज्यः ;
ज्यातव्यम् , ज्यापयितव्यम् , जिज्यासितव्यम् , जेजीयितव्यम् ;
ज्यानीयम् , ज्यापनीयम् , जिज्यासनीयम् , जेजीयनीयम् ;
[4]ज्येयम् , ज्याप्यम् , जिज्यास्यम् , जेजीय्यम् ;
[5]ईषज्ज्यानः-दुर्ज्यानः-सुज्यानः ; — —
जीयमानः , ज्याप्यमानः, जिज्यास्यमानः, जेजीय्यमानः ;
ज्यायः, ज्यापः, जिज्यासः, जेजीयः ;
ज्यातुम् , ज्यापयितुम् , जिज्यासितुम् , जेजीयितुम् ;
[6]ज्यानिः, ज्यापना, जिज्यासा, जेजीया ;
ज्यानम् , ज्यापनम् , जिज्यासनम् , जेजीयनम् ;
[7]जीत्वा, ज्यापयित्वा, जिज्यासित्वा, जेजीयित्वा ;
[8]प्रज्याय, प्रज्याप्य, प्रजिज्यास्य, प्रजेजीय्य ;
ज्यायम् २, जीत्वा २, } ज्यापम् २, ज्यापयित्वा २, } जिज्यासम् २, जिज्यासित्वा २, } जेजीयम् २ ; जेजीयित्वा २. }

(628) "ज्युङ् गतौ" (I-भ्वादिः-956. अक. अनि. आत्म.)

ज्यावकः-विका, ज्यावकः-विका, जुज्यूषकः-षिका, जोज्यूयकः-यिका ;
[A]ज्युतम् , इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकच्यवतिवत् (558)

---

1. ब्रह्म जिनातीति ब्रह्मज्यः। वयोहानिरूपार्थे धातुरकर्मकोऽपि, धातूनामनेकार्थकत्वेन चिन्तनाद्यर्थे सकर्मकत्वम् । 'कविधौ सर्वत्र सम्प्रसारणिभ्यो डः' (वा. 3-2-3) इति डप्रत्यये, डित्वसामर्थ्यादभस्यापि टेर्लोपे, रूपम् । एवं 'प्रज्यः' इत्यत्र 'आतश्चोपसर्गे' (3-1-136) इति कप्रत्ययस्थलेऽपि डो ज्ञेयः ।
2. 'श्याऽऽद्व्यधास्रु—' (3-1-141) इत्यादिना कर्तरि णप्रत्ययः । युगागमः ।
3. अच्प्रत्ययनिमित्तके यङो लुकि, 'न धातुलोपः—' (1-1-4) इति निषेधे, 'एरनेकाचः—' (6-4-82) इति यणादेशः ।
4. 'ईद्यति' (6-4-65) इति ईत्त्वे, गुणे रूपम् ।
5. 'आतो युच्' (3-3-128) इति ईषदाद्युपपदे खलपवादो युच् । अनादेशः ।
6. 'ग्लाम्लाज्याहाभ्यो निः' (वा. 3-3-94) इति क्तिनोऽपवादः निप्रत्ययः ।
7. क्त्वायाम् , सम्प्रसारणपूर्वरूपदीर्घाः ।
8. 'ज्यश्च' (6-1-42) इति ल्यपि सम्प्रसारणनिषेधः ।
A. 'स्तोत्रावमानैर्द्रुतवेणुवीणैश्च्युताशुभैर्ज्योमचरैर्ज्युतं ते ।' धा. का 2.36.